ॐ

# ॥ श्रीचिन्मयनामामृतस्तोत्रम् ॥

यस्य स्मरणमात्रेण भक्ताश्शिष्याश्च सेवकाः ।
प्रेरणां प्राप्नुवन्तीह चिन्मयं तं वयं नुमः ॥ १ ॥

नामपुष्पैः पूजयामस्सर्वभावेन सद्गुरुम् ।
अभीष्टफलसिद्ध्यर्थं भक्तिं प्राप्तुं विशेषतः ॥ २ ॥

ॐ अजोऽव्ययोऽविनाशी च तथाचिन्त्योऽप्रमेयस्सः ।
अद्वितीयोऽनिकेतश्च सदानुशासनप्रियः ॥ ३ ॥

अन्तःसाक्षी तु वृत्तीनामन्तर्यामी तथैव च ।
आनन्दात्मस्वरूपस्स आँग्लभाषाविदुत्तमः ॥ ४ ॥

ईश्वरस्सर्वभूतानामुदारहृदयस्सदा ।
उत्साहवर्धकस्त्वैक एवमोङ्कारवित्तथा ॥ ५ ॥

करुणासागरोऽसौ हि तथा कर्मपरायणः ।
कालातीतश्च कैवल्यस्वरूपस्स कृतात्मवान् ॥ ६ ॥

कृतकृत्यस्तथा गीताज्ञानयज्ञप्रचारकः ।
गुरुश्चापि गुणातीतो ग्रन्थकृच्चिन्मयो हि सः ॥ ७ ॥

छिन्नसंशय एवायं जगदात्मा तथैव च ।
जगत्साक्षी जनप्रियस्सर्वदा च जितेन्द्रियः ॥ ८ ॥

जीवब्रह्मैक्यविच्चासौ जीवन्मुक्तस्स एव हि ।
जीर्णमन्दिरोद्धारकस्तपोवनशिष्यस्तथा ॥९॥

तपस्वी तापनाशनस्तीर्थस्वरूप एव हि ।
तेजस्वी सर्वलोकेषु देहातीतस्सदैव सः ॥ १० ॥

द्वन्द्वातीतस्तथैवायं नित्यं च दृढनिश्चयः ।
धर्मसंस्थापको धीमान् धीरो धैर्यप्रदश्च सः ॥ ११ ॥

नारायणो निजानन्दो निरपेक्षश्च निःस्पृहः ।
निरुपमो निर्विकल्पस्तथा नित्यो निरञ्जनः ॥१२ ॥
परमः परब्रह्मैव पावनः स हि पावकः ।
पुरुषोत्तमस्स एवायं प्रसन्नात्मा स्वरूपतः ॥१३ ॥
फलासक्तिरहितोऽयं बहुभक्तो जनेषु च ।
बन्धमोचकश्शिष्याणां ब्रह्मनिष्ठस्तथैव च ॥१४ ॥
नित्यं ब्रह्मपरश्चैव भयनाशन एव हि ।
भारतगौरवो भूमा महावाक्योपदेशकः ॥१५ ॥
महर्षिर्मधुरश्चास्य स्वभावस्स मनोहरः ।
महात्मा स च मेधावी यतात्मा यज्ञकृच्च सः ॥१६ ॥
लोकप्रसिद्धो वाग्मी वै विभुश्चायं तथैव च ।
विनोदप्रिय एवायं विनयशीलस्स एव हि ॥ १७ ॥
वीतरागो गुरुर्नोऽयं वेदान्तवेद्य एव सः ।
शान्तः शान्तिप्रदस्सोऽयं शास्त्रोद्धारक एव हि ॥ १८ ॥
शुद्धसत्त्वस्सर्वदा च तथा च श्रुतिपारगः ।
श्रोत्रियश्चैव संन्यासी समबुद्धिस्तथैव च ॥ १९ ॥
सच्चिदानन्दस्वरूपस्स सर्वहितचिन्तकः ।
सत्यसङ्कल्पस्सन्तुष्टस्साधुश्च सुमनास्तथा ॥ २० ॥
सुहृल्लोके स्वयंज्योतिः स्थितप्रज्ञस्सदैव हि ।
क्षमाशीलो ज्ञानमूर्तिर्ज्ञानयोगी जनेषु च ॥ २१ ॥
ज्ञानतृप्तो नित्यशुद्धबुद्धमुक्तस्वरूपस्सः ।
एवं नामार्चितो भूयात् प्रसन्नो वरदो गुरुः ॥ २२ ॥

॥ ॐ श्रीसद्गुरुचिन्मयार्पणमस्तु ॥

***

|| śrīcinmayanāmāmṛtastotram ||

yasya smaraṇamātreṇa bhaktāśśiṣyāśca sevakāḥ |
preraṇāṁ prāpnuvantīha cinmayaṁ taṁ vayaṁ numaḥ || 1||
nāmapuṣpaiḥ pūjayāmassarvabhāvena sadgurum |
abhīṣṭaphalasiddhyarthaṁ bhaktiṁ prāptuṁ viśeṣataḥ|| 2||
om ajo'vyayo'vināśī ca tathācintyo'prameyassaḥ |
advitīyo'niketaśca sadānuśāsanapriyaḥ || 3 ||
antaḥsākṣī tu vṛttīnāmantaryāmī tathaiva ca|
ānandātmasvarūpassa āṁglabhāṣāviduttamaḥ || 4 ||
īśvarassarvabhūtānāmudārahṛdayassadā |
utsāhavardhakastvaika evamoṅkāravittathā || 5 ||
karuṇāsāgaro'sau hi tathā karmaparāyaṇaḥ |
kālātītaśca kaivalyasvarūpassa kṛtātmavān || 6 ||
kṛtakṛtyastathā gītājñānayajñapracārakaḥ |
guruścāpi guṇātīto granthakṛccinmayo hi saḥ || 7 ||
chinnasaṁśaya evāyaṁ jagadātmā tathaiva ca |
jagatsākṣī janapriyassarvadā ca jitendriyaḥ || 8 ||
jīvabrahmaikyaviccāsau jīvanmuktassa eva hi |
jīrṇamandiroddhārakastapovanaśiṣyastathā ||9||
tapasvī tāpanāśanastīrthasvarūpa eva hi |
tejasvī sarvalokeṣu dehātītassadaiva saḥ || 10 ||
dvandvātītastathaivāyaṁ nityaṁ ca dṛḍhaniścayaḥ |
dharmasaṁsthāpako dhīmān dhīro dhairyapradaśca saḥ || 11 ||
nārāyaṇo nijānando nirapekṣaśca niḥspṛhaḥ |
nirupamo nirvikalpastathā nityo nirañjanaḥ ||12||
paramaḥ parabrahmaiva pāvanaḥ sa hi pāvakaḥ |
puruṣottamassa evāyaṁ prasannātmā svarūpataḥ ||13 ||
phalāsaktirahito'yaṁ bahubhakto janeṣu ca |
bandhamocakaśśiṣyāṇāṁ brahmaniṣṭhastathaiva ca ||14 ||
nityaṁ brahmaparaścaiva bhayanāśana eva hi |
bhāratagauravo bhūmā mahāvākyopadeśakaḥ ||15 ||
maharṣirmadhuraścāsya svabhāvassa manoharaḥ |
mahātmā sa ca medhāvī yatātmā yajñakṛcca saḥ ||16 ||
lokaprasiddho vāgmī vai vibhuścāyaṁ tathaiva ca |
vinodapriya evāyaṁ vinayaśīlassa eva hi || 17 ||
vītarāgo gururno'yaṁ vedāntavedya eva saḥ |
śāntaḥ śāntipradasso'yaṁ śāstroddhāraka eva hi || 18 ||
śuddhasattvassarvadā ca tathā ca śrutipāragaḥ |

śrotriyaścaiva sannyāsī samabuddhistathaiva ca || 19 ||
saccidānandasvarūpassa sarvahitacintakaḥ |
satyasaṅkalpassantuṣṭassādhuśca sumanāstathā || 20 ||
suhṛlloke svayañjyotiḥ sthitaprajñassadaiva hi |
kṣamāśīlo jñānamūrtirjñānayogī janeṣu ca || 21 ||
jñānatṛpto nityaśuddhabuddhamuktasvarūpassaḥ |
evaṁ nāmārcito bhūyāt prasanno varado guruḥ || 22 ||

|| om śrīsadgurucinmayārpaṇamastu ||